तस्मिन् स्नातो नरो देवि ! मम लोके महीयते ।
तत्राथ मुञ्चते प्राणान्मम लोकं स गच्छति ॥
तद्दक्षिणे महादेवि ! ऋषितीर्थं परं मम ।
तत्र स्नातो नरो देवि ! ऋषिलोकं प्रपद्यते ॥
अथात्र मुञ्चते प्राणान्मम लोके महीयते ।
दक्षिणे ऋषितीर्थस्य मोक्षतीर्थं परं मम ॥
स्नानमात्रेण वसुधे ! मोक्षं प्राप्नोति मानवः ।
तत्राथ मुञ्चते प्राणान् मम लोके महीयते ॥
तत्रैव कोटितीर्थं हि तीर्थानामपि दुर्लभम् ।
तत्र स्नानेन दानेन मम लोके महीयते ॥
कोटितीर्थे नरः स्नातः सन्तर्प्य पितृदेवताः ।
तारिताः पितरस्तेन तथैव प्रपितामहाः ॥
कोटितीर्थे नरः स्नातो ब्रह्मलोके महीयते ।
तत्रैव वायुतीर्थन्तु पितॄणामपि दुर्लभम् ॥
पिण्डं दद्यात्तु वसुधे ! पितृलोकं स गच्छति ।
गयापिण्डप्रदानेन यत् फलं लभते नरः ॥
तत् फलं लभते देवि ! ज्यैष्ठे दानान्न संशयः ।
द्वादशैतानि तीर्थानि देवानां दुर्लभानि च ॥
स्नानं दानं जपो होमः सहस्रगुणितं भवेत् ।
दृष्ट्वा स्मरणमात्रेण सर्व्वपापैः प्रमुच्यते ॥
श्रुत्वा तीर्थस्य माहात्म्यं सर्व्वान् कामानवा-
प्नुयात् ॥”

इत्यादि वराहपुराणे मथुरातीर्थप्रभावः ॥ *॥
इतः प्रभृति सप्तविंशाध्यायेषु मथुरामाहात्म्यं
ज्ञेयम् ॥

मथुरेशः, पुं, (मथुराया ईशः ।) श्रीकृष्णः । इति
शब्दरत्नावली ॥

मथूरा, स्त्री, (मथ् + बाहुलकात् ऊरः टाप् ।)
मथुरा । इति द्विरूपकोषः ॥

मद इ ङ स्वप्ने । जाड्ये । मदे । मोदे । स्तुतौ ।
गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-
स्वप्ने जाड्ये मदे मोदे अक०-स्तुतौ गतौ च
सक०-सेट् ।) मन्द्यते । ङ मन्दते जनः स्वपिति
जडो भवति माद्यति मोदते स्तौति गच्छति
वा इत्यर्थः । इति दुर्गादासः ॥

मद, ई भ य इर् णि हर्षे । इति कविकल्पद्रुमः ॥
दिवा०-पर०-अक०-सेट् ।) ई णि मत्तोऽस्ति ।
भ य माद्यति । इर् अमदत् अमादीत् ।
अस्मात् पुषादित्वात् नित्यं ङ इत्यन्ये । इति
दुर्गादासः ॥

मद, क ङ तृप्तियोगे । इति कविकल्पद्रुमः ॥
(चुरा०-आत्म०-सक०-सेट् ।) क ङ मनो माद-
यते यस्य शास्त्राभ्यासरसायनात् । इति दुर्गा-
दासः ॥

मद, म गर्व्वे । ग्लेपने । इति कविकल्पद्रुमः ॥
(भ्वा०-पर०-अक०-सेट् ।) गर्व्वोऽहङ्कारः ।
ग्लेपनं दैन्यम् । म मदयति मौर्खं सम्पत्तिः ।
मदयति शत्रुं शूरः । इति दुर्गादासः ॥

मदः, पुं, (मदयतीति । मद् + अच् ।) हस्ति-
गण्डजलम् । (यथा, भारवौ । २ । १८ ।
“मदसिक्तमुखैर्मृगाधिपः
करिभिर्वर्त्तयते स्वयं हतैः ।”)
तत्पर्य्यायः । दानम् २ ॥ (माद्यते इति । मद् +
“मदोऽनुपसर्गे ।” ३ । ३ । ६७ । इति अप् ।)
हर्षः । (यथा, ऋग्वेदे । १ । ४ । २ ।
“उप नः सवनागहि सोमस्य सोमपाः पिब गोदा इद्रेवतो
मदः ॥” “मदो हर्षः ।” इति तद्भाष्ये सायनः ।)
तत्पर्य्यायः । आमोदः २ । इत्यमरः । ३ ।
२ । १२ ।) रेतः । कस्तूरी । (पर्य्यायो यथा,—
“मृगनाभिर्मृगमदो मदः कस्तूरिकाण्डजः ॥”
इति वैद्यकरत्नमालायाम् ॥
रोगविशेषः । उन्मादस्य प्रथमावस्थायां यथा,
“स चाप्रवृद्धस्तरुणो मदसंज्ञां बिभर्त्ति च ।”
इति माधवकृतरुग्विनिश्चये उन्मादाधिकारे ॥
विशेषोऽस्य यथा —
यदा तु रक्तवाहीनि रससंज्ञावहानि च ।
पृथक् पृथक् समस्ता वा स्रोतांसि कुपिता मलाः ॥
मलिनाहारशीलस्य रजोमोहावृतात्मनः ।
प्रतिहत्यावतिष्ठन्ते जायन्ते व्याधयस्तदा ॥
मदमूर्च्छायसंन्यासास्तेषां विद्याद्विचक्षणः ।
यथोत्तरं बलाधिक्यं हेतुलिङ्गोपशान्तिषु ॥
दुर्ब्बलश्चेतसः स्थानं यदा वायुः प्रपद्यते ।
मनो विक्षोभयन् जन्तोः संज्ञां संमोहयेत्तदा ॥
पित्तमेवं कफश्चैवं मनो विक्षोभयन् नृणाम् ।
संज्ञां नयत्याकुलतां विशेषश्चात्र वक्ष्यते ॥
सप्रानल्पद्रुताभाषचलस्खलितचेष्टितम् ।
विद्याद्वातमदाविष्टं रूक्षश्यावारुणाकृतिम् ॥
सक्रोधपरुषाभाषं संप्रहारकलिप्रियम् ।
विद्यात् पित्तमदाविष्टं रक्तपीतासिताकृतिम् ॥
स्वल्पसम्बन्धवचनं तन्द्रालस्यसमन्वितम् ।
विद्यात् कफमदाविष्टं पाण्डुं प्रध्यानतत्परम् ॥
सर्व्वाण्येतानि रूपाणि सन्निपातकृते मदे ।
जायन्ते शाम्यति त्वाशु मदो मद्यमदाकृतिः ॥
यश्च मद्यमदः प्रोक्तो विषजो रौधिरश्च यः ।
सर्व्व एते मदानर्त्ते वातपित्तकफाश्रयात् ॥”
इति चरके सूत्रस्थाने चतुर्विंशेऽध्याये ॥)
गर्व्वः । इति मेदिनी । दे, १२ ॥ (यथा,
भारवौ । २ । ४९ ।
“मदमानसमुद्धतं नृपं
न वियुङ्क्ते नियमेन मूढता ॥”)
मद्यम् । क्षैयम् । मत्ततेति यावत् । इति हेम-
चन्द्रः । २ । २२६ ॥ (यथा, मनौ । ७ । ४७ ।
“मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः ।”
“तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः ॥”)
मदः । कल्याणवस्तु । इति धरणिः ॥ * ॥
मदलक्षणं यथा,—
“अहं महात्मा धनवान् मत्तुल्यः कोऽस्ति भूतले ।
इति यज्जायते चित्तं मदः प्रोक्तः स कोविदैः ॥”
इति पाद्मे क्रियायोगसारे १६ अध्यायः ॥
तस्य उत्पत्तिर्यथा ।
“बुद्धेर्मोहः समभवदहङ्काराद‌भून्मदः ।”
इति मात्स्ये ३ अध्यायः ॥
(दानवभेदः । यथा, हरिवंशे । ३ । ८६ ।
“असिलोमा सुकेशी च शठश्च बलको मदः ॥”

मदकटः, पुं, (मदं कटति प्रकटयतीति । कट् +
अच् ।) षण्डः । षाँड़ इति भाषा ॥ यथा
हड्‌वरो हट्‌वरो गोपतिः षण्डो वृषो मदकटो
हलः । इति हेमचन्द्रः । ४ । ३२५ ॥

मदकलः, पुं, (मदेन कलोऽव्यक्तमधुरध्वनिर्यस्य ।
मत्तहस्ती । तत्पर्य्यायः । मदोत्कटः २ । इत्य-
मरः । २ । ८ । ३५ ॥ अव्यक्तप्रलापी । इति
शब्दरत्नावली ॥ मदाव्यक्तवाणिनि त्रि । इति
मेदिनी । ले, १५८ ॥ (यथा, उत्तरचरिते २ अङ्के ।
“मदकलमयूरकण्ठच्छविभिरवकीर्णानि ।”)

मदगन्धः, पुं, (मदस्य दानस्येव गन्धोऽस्य ।
सप्तच्छदवृक्षः । इति राजनिर्घण्टः ॥ (विवरणम्
सप्तच्छदशब्दे ज्ञेयम् ।)

मदगन्धा, स्त्री, (मदः मादनः गन्धोऽस्याः ।
मदिरा । अतसी । इति राजनिर्घण्टः ॥

मदघ्नी, स्त्री, (मदं मत्ततां हन्तीति । मद् + हन् +
टक् ङीप् ।) पूतिका । इति जटाधरः ॥

मदनः, पुं, (मदयतीति । मद् + णिच् ल्युः ।
कामदेवः । इत्यमरः । १ । १ । २६ ॥
तस्य नाम्नां व्युत्पत्तिर्यथा । ऋषय ऊचुः ।
“यस्मात् प्रमथ्य चेतस्त्वं जातोऽस्माकं तथा विधेः
तस्मान्मन्मथनाम्ना त्वं लोके गेयो भविष्यसि ॥
जगत्सु कामरूपस्त्वं त्वत्समो न हि विद्यते ।
अतस्त्वं कामनाम्नापि ख्यातो भव मनोभव ! ॥
मदनान्मदनाख्यस्त्वं शम्भोर्दर्पात् सदर्पकः ।
तथा कन्दर्पनाम्नापि लोके ख्यातो भविष्यसि ॥”
इति कालिकापुराणे २ अध्याय, ॥
ब्रह्मवक्तस्योत्पत्तिर्यथा,—
“प्रहृष्टमानसः पुत्त्रं कन्यकाञ्च ससर्ज्ज ह ।
हृष्टस्य कामिनः पुत्त्रः कामदेवो बभूव च ॥
कन्या षोड़शवर्षीया रत्नभूषणभूषिता ॥
उवाच पुत्त्रं स विधिः सुदीप्तं पुरतः स्थितम् ।
दुर्न्निवार्य्यं मत्कलांशं स्वात्मारामं मनोहरम् ॥
ब्रह्मोवाच ।
स्त्रीपुंसोः क्रीड़नार्थाय सुदा त्वञ्च विनिर्म्मितः ।
हृदि योगेन सर्व्वेषामधिष्ठानं करिष्यसि ॥
सम्मोहनं समुद्वेगबीजं स्तम्भितकारणम् ।
उन्मत्तबीजं ज्वलनं प्रम्यचेतनहारकम् ॥
प्रगृह्यैतान्मया दत्तान् सर्व्वान् सम्मोहनं कुरु ।
दुर्निवार्य्यो मम वराद्भव वत्स ! भवेषु च ॥
बाणान्दत्त्वैवमुक्त्वा च प्रहृष्टश्च जगद्विधिः ।
दृष्ट्वा चार्च्चं दुहितरं वरं दातुं समुद्यतः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ३५ अध्यायः ॥
(योगाचार्य्यरूपः शिवस्यावतारविशेषः ।
यथा, शिवपुराणे वायुसंहितायाम् । २ । १० ।
१—२ ।
श्रीकृष्ण उवाच ।
“युगावर्त्तेषु सर्व्वेषु योगाचार्य्यच्छलेन तु ।
अवताराणि सर्व्वस्य शिष्यांश्च भगवन् ! वद ॥”
उपमन्युरुवाच ।
“श्वेतः सुतारो मदनः सुहोत्रः कंक एव च ॥”
महादेवः । मदयति भक्तानां मनः इति